रङ्गुलयः । स्रोतांसि च वक्ष्यमाणानि । एष प्रत्यङ्गविभाग उक्तः ।” इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ॥ अप्रधानम् । यथा, निरुक्ते । ७ । १ । ५ ।
“एक आत्मा बहुधा स्तूयते एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्त्यपि ॥” अङ्गं अङ्गं प्रति । यथा, गीतगोविन्दे । ११ । ११ ।
“ध्वान्तं नीलनिचोलचारुसुदृशां प्रत्यङ्गमालिङ्गति ॥”
तथा च मनुः । ८ । २०८ ।
“यस्मिन् कर्म्मणि यास्तु स्युरुक्ताः प्रत्यङ्गदक्षिणाः ।
स एव ता आददीत भजेरन् सर्व्व एव वा ॥”
नृपविशेषे, पुं । यथा, महाभारते । ५।१।२३५ ।
“महापुराणसम्भाव्यः प्रत्यङ्गः परहा श्रुतिः ।
एते चान्ये च राजानः शतशोऽथ सहस्रशः ।
श्रूयन्तेऽयुतशश्चान्ये संख्याताश्चैव पद्मशः ॥” )
प्रत्यङ्गिरा, स्त्री, देवीविशेषः । तस्या ध्यानम् । यथा,—
“शवोपरिसमासीनां रक्ताम्बरतनुच्छदाम् ।
सर्व्वाभरणसंयुक्तां गुञ्जाहारविभूषिताम् ॥
षोड़शाब्दाञ्च युवतीं पीनोन्नतपयोधराम् ।
कपालकर्तृकाहस्तां परमानन्दरूपिणीम् ।
वामदक्षिणयोगेन ध्यायेन्मन्त्रविदुत्तमाम् ॥”
इति प्रत्यङ्गिरास्तोत्रान्तर्गतम् ॥
प्रत्यनीकः, पुं, ( प्रतिगतः अनीकं युद्धमिति । ) शत्रुः । इति हेमचन्द्रः । ३ । ३९२ ॥ ( प्रतिपक्षः । विरोधी । यथा, महाभारते । ७ । १० । ३६ ।
“यस्य यन्ता हृषीकेशो योद्धा यस्य धनञ्जयः ।
रथस्य तस्य कः संख्ये प्रत्यनीको भवेद्रथः ॥”
यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये ।
“अतीवायतयामास्तु चपा येष्वृतुषु स्मृताः ।
तेषु तत्प्रत्यनीकाढ्यं भुञ्जीतप्रातरेव तु ॥”
क्ली, प्रतिपक्षसैन्यम् । यथा, भगवद्गीतायाम् । ११ । ३२ ।
“ऋतेऽपि त्वां न भविष्यन्ति सर्व्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥”
अलङ्कारविशेषः । यदुक्तं काव्यप्रकाशे ।
“प्रतिपक्षमशक्तेन प्रतिकर्त्तुं तिरस्क्रिया ।
या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते ॥”
उदाहरणं यथा,—
“त्वं विनिर्ज्जितमनोभवरूपः
सा च सुन्दर ! भवत्यनुरक्ता ।
पञ्चभिर्युगपदेव शरैस्तां
तापयत्यनुशयादिव कामः ॥”)
प्रत्यन्तः, पुं, ( प्रतिगतोऽन्तमिति । अत्यादयः क्रान्ताद्यर्थे । इति समासः ।) म्लेच्छदेशः । इत्यमरः ।२ । १ । ७ ॥ (प्रान्तदुर्गम् । यथा, रघुः । ४ । २६ ।
“स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ॥”
“गुप्तौ मूलं स्वनिवासस्थानं प्रत्यन्तः प्रान्तदुर्गञ्च येन सः ।” इति तट्टीकायां मल्लिनाथः ॥
तद्देशजाते, त्रि ॥ यथा, वराहसंहितायाम् । ४ । २१ ।
“प्रत्यन्तान् कुनृपांश्च हन्त्युडुपतिः शृङ्गे कुजेनाहते ॥”)
सन्निकृष्टे च त्रि ॥
प्रत्यन्तपर्व्वतः, पुं, ( प्रत्यन्तः सन्निकृष्टः पर्व्वतः । ) महापर्व्वतसमीपवर्त्तिक्षुद्रपर्व्वतः । इत्यमरः । २ । ३ । ७ ॥
प्रत्यभियोगः, पुं, ( प्रतिरूपोऽभियोगः । ) प्रत्यपराधः । यथा,—
“अभियोगमनिस्तीर्य्य नैनं प्रत्यभियोजयेत् ।
अभियुक्तञ्च नान्येन नोक्तं विप्रकृतिं नयेत् ॥”
“अभियुज्यत इति अभियोगोऽपराधस्तमभियोगमनिस्तीर्य्यापह्नुत्यैनमभियोक्तारं न प्रत्यभियोजयेदपराधेन न संयोजयेत् । यद्यपि प्रत्यभिस्कन्दनं प्रत्यभियोगरूपन्तथापि स्वापराधपरिहारात्मकत्वान्नास्य प्रतिषेधस्य विषयः । अतः स्वाभियोगानुपमर्द्दनरूपस्य प्रत्यभियोगस्यायं निषेधः ।” इति मिताक्षरा ॥
प्रत्यभिवादः, पुं, ( प्रति + अभि + वद् + णिच् + भावे घञ् । ) अभिवादस्य गुरोराशीर्व्वचनम् । इति गोयीचन्द्रः ॥
प्रत्यभिवादनं, पुं, ( प्रति + अभि + वद् + णिच् + भावे ल्युट् । ) अभिवादस्य गुरोराशीर्व्वचनम् । इति गोयीचन्द्रः ॥
प्रत्ययः, पुं, ( प्रति + इण् + भावकरणादौ यथायथं अच् । ) अधीनः । शपथः । ज्ञानम् । ( यथा, गारुड़े २३६ अध्याये ।
“जाग्रत्संस्कारसम्भूतः प्रत्ययो विषयान्वितः ॥”)
विश्वासः । ( यथा, कुमारे । ४ । ४५ ।
“इत्थं रतेः किमपि भूतमदृश्यरूपं
मन्दीचकार मरणव्यवसायबुद्धिम् ।
तत्प्रत्ययाच्च कुसुमायुधबन्धुरेनामाश्वासयत् सुचरितार्थपदैर्व्वचोभिः ॥” )
हेतुः । ( यथा, रघुः । १० । ३ ।
“अतिष्ठत् प्रत्ययापेक्षसन्ततिः स चिरं नृपः ॥”)
रन्ध्रम् । शब्दः । इत्यमरः । ३ । ३ । १४७ ॥
प्रथितत्वम् । आचारः । इति मेदिनी । ये, ८६ ॥
निश्चयः । ( यथा, मनुः । ८ । २५३ ।
“यदि संशय एव स्यात् लिङ्गानामपि दर्शने ।
साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः ॥”)
स्वादुः । इति हेमचन्द्रः ॥ प्रकृत्युत्तरजायमानः । वोपदेवेनास्य त्यसंज्ञा कृता । प्रत्याययन्तीति सुप्तिङ्कृत्तद्धिताः प्रत्ययाः । इति संक्षिप्तसारव्याकरणम् ॥ ( यथा, रघुः । ११ । ५६ ।
“ता नराधिपसुता नृपात्मजैस्ते च ताभिरगमन् कृतार्थताम् ।
सोऽभवद्वरवधूसमागमः
प्रत्ययप्रकृतियोगसन्निभः ॥” )
सहकारी । इति त्रिकाण्डशेषः ॥
प्रत्ययकारिणी, स्त्री, ( प्रत्ययस्य विश्वासस्य कारिणी । ) मुद्रा । इति त्रिकाण्डशेषः ॥ मोहर इति पारस्यभाषा ॥
प्रत्ययितः, त्रि, ( प्रत्ययो विश्वासः सञ्जातोऽस्येति । प्रत्यय + “तदस्य सञ्जातं तारकादिभ्य इतच् ।” ५ । २ । ३६ । इति इतच् ।) आप्तः । विश्वस्तः । इत्यमरः । ३ । ८ । १३ ॥ ( यथा, कथासरित्सागरे । १५ । ६८ ।
“तत् श्रुत्वा वत्सराजा सोऽथ प्रत्ययितान् द्विजान् ॥” )
प्रत्यर्थी, [ न् ] त्रि, ( प्रतिरोधं प्रतिकूलं वा अर्थयते इति । प्रति + अर्थ + णिनिः । ) शत्रुः । इत्यमरः । २ । ८ । ११ ॥ ( यथा, साहित्यदर्पणे । ३ परिच्छेदे ।
“नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि पाणिद्वयं वक्षोजौ करिकुम्भविभ्रमकरीमत्युन्नतिं गच्छतः ॥”)
पुं, प्रतिवादी । इति शब्दरत्नावली ॥ ( यथा, मनुः । ८ । ७९ ।
“सभान्तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ ।
प्राड्विवाकोऽनुयुञ्जीत विधिनानेन सान्त्वयन् ॥”)
अर्थिप्रतिपक्षः । यथा,—
“प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना ।
समामासतदर्द्धाहर्नामजात्यादिचिह्नितम् ॥”
“अर्थ्यत इत्यर्थः साध्यः । सोऽस्यास्तीत्यर्थी । तत्प्रतिपक्षः प्रत्यर्थी ।” इति मिताक्षरा ॥
प्रत्यर्पितं, त्रि, ( प्रति + ऋ + णिच् + क्तः । ) प्रतिदत्तम् । यथा । “अर्थव्यवहारोऽपि एकस्मिन् वत्सरे यत्संख्याकं यद्द्रव्यं यतो येन गृहीतं प्रत्यर्पितञ्चेति । पुनरन्यस्मिन् वत्सरे तद्द्रव्यं तत्संख्याकं तत्स्तेन गृहीतं याच्यमानोऽपि यदि ब्रूयात् सत्यं गृहीतं प्रत्यर्पितञ्चेति वत्सरान्तरे गृहीतं प्रत्यर्पितञ्च नास्मिन् वत्सर इत्युपयुज्यते ।” इति मिताक्षरा ॥
प्रत्यवसानं, क्ली, ( प्रति + अव + सो + ल्युट् । ) भोजनम् । इति हेमचन्द्रः । ३ । ८७ ॥ ( पर्य्यायान्तरमस्य यथा,—
“जग्धिः प्रत्यवसानञ्च भक्षणं भोजनाशने ॥”
इति वैद्यकरत्नमालायाम् ॥)
प्रत्यवसितं, त्रि, (प्रति + अव + सो + क्तः ।) भक्षितम् । इत्यमरः । ३ । २ । ११० ॥
प्रत्यवस्कन्दः, पुं, ( प्रति + अव + स्कन्द + घञ् । ) चतुर्व्विधोत्तरान्तर्गतोत्तरविशेषः ॥
प्रत्यवस्कन्दनं, क्ली, ( प्रति + अव + स्कन्द + ल्युट् ।) चतुर्व्विधोत्तरान्तर्गतोत्तरविशेषः । यथा,—
“प्रत्यवस्कन्दनं नाम सत्यं गृहीतं प्रतिदत्तं प्रतिग्रहलब्धमिति वा । यथाह नारदः ।
अर्थिना लेखितो योऽर्थः प्रत्यर्थी यदि तत्तथा ।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं स्मृतम् ॥”
इति मिताक्षरा ॥